# 9

1075CH09

# अव्ययानि

**1. अधोलिखितानि वाक्यानि पठत —**

- दुर्वहम् अत्र जीवितम्।
- प्रकृति: एव शरणम्।
- स: सदा सत्यं वदति।
- यानानां पङ्क्तयो हि अनन्ता:।
- वायुयानं भृशं दूषितम्।
- जलं निर्मलं न अस्ति।
- एतत् खलु राजासनम् अस्ति।
- अलम् अतिशालीनतया।
- ननु भगवान् वाल्मीकि: अयम्।

उपरि यानि रेखाङ्कितानि पदानि सन्ति तानि सर्वाणि अव्ययपदानि सन्ति। अव्ययपदानि लिङ्गवचनविभक्तिषु न परिवर्तन्ते। तद्यथा —

(क) i. बाल: अपि धावति। ii. बालिका अपि धावति।

अत्र लिङ्गकारणात् अपि परिवर्तनं न भवति।

(ख) i. यदा स: आगच्छति तदा ते गच्छन्ति। ii. यदा ते आगच्छन्ति तदा वयं गच्छाम:।

अत्र वचनकारणात् अपि 'यदा-तदा' अव्यययो: परिवर्तनं न भवति।

(ग) i. बाल: उच्चै: वदति। ii. पिता बालम् उच्चै: वदति।

अत्र विभक्तिकारणाद् अपि 'उच्चै:' इति अव्ययपदे परिवर्तनं न भवति।

अत:—

सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।
वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्।।

- अव्ययानि न परिवर्तन्ते।
- अव्ययानि त्रिषु लिङ्गेषु सदृशानि भवन्ति।
- अव्ययानि त्रिषु वचनेषु सदृशानि भवन्ति।
- अव्ययानि सर्वासु विभक्तिषु सदृशानि भवन्ति।

© NCERT not to be republished

# अव्ययपदानि

| कालवाचकानि | स्थानवाचकानि | युग्मानि | समानार्थकानि | विकीर्णानि |
|---|---|---|---|---|
| पुरा- प्राचीनकाल में<br>सद्यः- तुरन्त<br>सपदि- तुरन्त<br>अचिरात्- अभी<br>अचिरेण- अभी<br>सततम्- निरन्तर<br>अभितः- दोनो ओर<br>परितः- चारो ओर<br>उभयतः- दोनो ओर<br>सर्वतः- सब ओर<br>कदाचित्- कभी, किसी समय<br>अचिरम्- अभी<br>एकदा- एक बार<br>सकृत्- एक बार<br>सहसा- अचानक<br>सदा- हमेशा<br>इतस्ततः- इधर-उधर<br>कुतः- कहाँ से<br>नक्तम्- रात<br>दिवा- दिन<br>अद्य- आज<br>ह्यः- बीता हुआ कल<br>श्वः- आने वाला कल<br>वृथा- व्यर्थ<br>समीपे- पास में<br>दूरे - दूर | यत्र- जहाँ<br>तत्र- वहाँ<br>उपरि- ऊपर<br>कुत्र- कहाँ<br>अत्र- यहाँ<br>सर्वत्र- सब जगह<br>नीचैः- नीचे | यावत्-तावत् = जब तब<br>यत्र-तत्र= जहाँ वहाँ<br>शनैः-शनैः= धीरे-धीरे<br>यदा = जब<br>तदा = तब<br>कदा = कब<br>यदि तर्हि= यदि तो<br>मुहुर्मुहुः= बार-बार<br>यथा-तथा= जैसा वैसा<br>यथापि तथापि= जैसे भी वैसे भी | ननु, नूनम्, खलु — निश्चय<br>सम्प्रति, अधुना, इदानीम्, साम्प्रतम् — अब<br>सदा<br>सर्वदा<br>इत्थम्- इस प्रकार से<br>एवम्- इस प्रकार | अपि-भी<br>वृथा-बेकार<br>अथ किम्- हाँ और क्या<br>च- और<br>अपरम्- और भी<br>सत्वरम्- शीघ्र<br>अन्यथा- दूसरे प्रकार से<br>सर्वथा- सब प्रकार से<br>एव- ही<br>प्रति- ओर<br>अलम्- बस, समर्थ<br>च- और<br>न- नहीं<br>मा- मत<br>अतः- इसलिए<br>इति- इस प्रकार<br>उच्चैः- ज़ोर से<br>पुनः- फिर<br>तूष्णीम्- चुपचाप<br>तु- तो<br>परम्- परन्तु<br>कथम्-कैसे<br>अनृतम्- झूठ<br>ततः- तत्पश्चात्<br>परस्परम्-आपस में<br>इव- के समान |

© NCERT
not to be republished



Reprint 2026-27

## अभ्यासः

**1. अधोलिखितानि वाक्यानि पठित्वा अव्ययपदानि चित्वा लिखत—**

**अव्ययपदानि**

(i) एकदा तस्य भार्या पितुर्गृहं प्रति चलिता। – ..............................
(ii) भवान् कुतः भयात् पलायितः। – ..............................
(iii) तत्र गम्यताम्। – ..............................
(iv) त्वं सत्वरं चल। – ..............................
(v) तेन सदृशं न अस्ति। – ..............................
(vi) गीता सुगीता च वदतः। – ..............................
(vii) यदा सः पठति तदा एव शोभते। – ..............................
(viii) तापसौ लवकुशौ ततः प्रविशतः। – ..............................
(ix) अलम् अतिदाक्षिण्येन। – ..............................
(x) अहम् अपि श्रावयामि। – ..............................

**2. उचिताव्ययपदैः रिक्तस्थानानि पूरयत—**

**मञ्जूषा**

| सर्वत्र, एव, इति, ननु, एवम्, तत्र, उच्चैः, तथापि, बहुधा, मा |
|---|

(i) मम गुरुः .............................. भगवान् वाल्मीकिः।
(ii) कः .............................. भणति?
(iii) कुपिता सा .............................. वदति।
(iv) त्वं .............................. गच्छ।
(v) यूयं चापलं .............................. कुरुत।
(vi) कृषीवलः बहुवारं प्रयत्नमकरोत् .............................. वृषः नोत्थितः।
(vii) कृषकः बलीवर्दं .............................. पीडयति।
(viii) बहूनि अपत्यानि मे सन्ति .............................. सत्यम्।
(ix) सर्वेषु अपत्येषु जननी तुल्यवत्सला .............................. ।
(x) .............................. जलोपप्लवः सञ्जातः।



© NCERT not to be republished

Reprint 2026-27

3. **विपर्ययाव्ययपदैः सह योजयत—**

| | |
|---|---|
| यत्र .................. | यथा .................. |
| यथैव .................. | यदा .................. |
| यदैव .................. | यावत् ................ |
| अत्र.................. | यदि .................. |

4. **उचितार्थैः सह मेलनं कुरुत—**

| | | |
|---|---|---|
| (i) | पुरा | नहीं/मत |
| (ii) | उच्चैः | हमेशा |
| (iii) | नूनम् | परंतु |
| (iv) | इत्थम् | ही |
| (v) | सर्वथा | इस प्रकार |
| (vi) | एवम् | सब प्रकार से |
| (vii) | एव | इस प्रकार से |
| (viii) | परम् | निश्चय |
| (ix) | सदा | ज़ोर से |
| (x) | मा | प्राचीनकाल में |



© NCERT not to be republished

Reprint 2026-27

**5. उचिताव्ययपदैः सह रिक्तस्थानानि पूरयत —**

**मञ्जूषा**

| |
|---|
| यथा-तथा, यदि-तर्हि, यथैव-तथैव, यावत्-तावत्, यत्र-तत्र। |

(i) .................... लव: .................... कुश:।
(ii) .................... अहं कृष्णवर्ण: .................... त्वं किं गौराङ्ग:!
(iii) .................... गुरु: वदति .................... शिष्य: करोति।
(iv) .................... वृक्षा: .................... खगा:।
(v) .................... लता आगच्छति .................... त्वं तिष्ठ।

**6. उदाहरणानुसारं लिखत —**

(i) श्व: सोमवासर:....................
(ii) ....................
(iii) ....................
(iv) ....................
(v) ....................




**7. पर्यायाव्ययपदानि लिखत —**

ननु: .................... ....................

सम्प्रति: .................... ....................